# Model Question Paper

## (According to Old Syllabi of Entrance Test)

## पी–एच्०डी० संस्कृत–पाठ्यक्रमे पञ्जीकरणार्थं प्रवेश–परीक्षा

### प्रश्नपत्रम्–II

### संस्कृतम् (वस्तुनिष्ठम्)

# Entrance Test for Registration to Ph. D. Sanskrit Course

**Paper-II**
**SANSKRIT (Objective)**

समयः : एकहोरा — पूर्णांकाः : 50

***Time : One Hour*** — ***Max. Marks : 50***

## निर्देशाः

## Instructions

1. अस्मिन् प्रश्नपत्रे 25 प्रश्नाः सन्ति ।
   **(This Question Paper comprises of 25 questions.)**
2. प्रत्येकं शुद्धोत्तरम् अंकद्वयम् अर्हति ।
   **(Each correct answer carries 2 marks.)**
3. एकस्य प्रश्नस्य एकम् एव उत्तरम् लेखनीयम् ।
   **(Write one answer only per question.)**
4. परीक्षायां सम्पन्नायां परीक्षार्थी प्रश्नोत्तरपत्रम् परीक्षा–निरीक्षकाय समर्पयेत् ।
   **(The Question Paper-cum-Answer Sheet is to be handed over by the candidate to the Invigilator at the end of the examination/test.)**

⌘

**टिप्पणीः- सर्वेऽपि (25) प्रश्नाः समाधेयाः। प्रत्येकं प्रश्नस्य मूल्यम् अंकद्वयं विद्यते।**

**Note:- Attempt all (25) questions. Each question carries 2 (two) marks.**

| प्रश्न-संख्या Question No. | प्रश्नाः Questions | उत्तराणि Answers |
|---|---|---|
| 1 | ऋग्वेदे कति अनुवाकाः सन्ति ? | |
| 2 | व्यासेन ऋग्वेदः कः पाठितः ? | |
| 3 | सायणस्य का शाखा आसीत् ? | |
| 4 | अथर्ववेदस्य कति ब्राह्मणानि सन्ति ? | |
| 5 | ईशोपनिषदि कति मन्त्राः सन्ति ? | |
| 6 | शुनःशेपस्य पितुः किं नाम आसीत् ? | |
| 7 | आभ्यन्तरयत्नस्य कति भेदाः सन्ति ? | |
| 8 | 'गव्यूतिः' इति पदस्य सन्धिच्छेदः करणीयः । | |
| 9 | 'शि' इत्यस्य का सञ्ज्ञा भवति ? | |
| 10 | 'माङ्' इति उपपदे धातोः कः लकारः प्रयुज्यते ? सूत्रोल्लेखपूर्वकं प्रतिपादनीयम् । | |
| 11 | 'आधारोऽधिकरणम्' इति सूत्रोक्तस्य आधारस्य कति भेदाः सन्ति ? | |
| 12 | 'राजदन्तः' इति समस्तपदस्य लौकिको विग्रहो लेख्यः। | |
| 13 | अपत्यत्वेन विवक्षितस्य पौत्रादेः का सञ्ज्ञा भवति ? सूत्रोल्लेखपूर्वकं प्रतिपादनीयम् । | |
| 14 | केशवमिश्रमते शब्दप्रमाणस्य लक्षणं किम् ? | |
| 15 | सांख्यकारिकामते केभ्यः पञ्चभूतानि उत्पद्यन्ते ? | |
| 16 | अर्थसंग्रहमते वेदस्य लक्षणं किम् ? | |
| 17 | लौगाक्षिभास्करमते भावनायाः लक्षणं किम् ? | |
| 18 | अद्वैतवेदान्ते निर्विकल्पकसमाधौ कति विघ्नाः सन्ति ? | |

| प्रश्न-संख्या Question No. | प्रश्नाः Questions | उत्तराणि Answers |
|---|---|---|
| 19 | अद्वैतमते मुक्तपुरुषस्य कतमं कर्म भोगेन क्षीयते ? | |
| 20 | रावणवधमहाकाव्यस्य रचयिता कः ? | |
| 21 | वसन्ततिलकाछन्दसः लक्षणं किम् ? | |
| 22 | अधोलिखिते पद्ये कोऽर्थालंकारः ?<br>नद्यश्च नार्यश्च सदृग्स्वभावा-<br>स्तुल्यानि कूलानि कुलानि तासाम् ।<br>तोयैश्च दोषैश्च निपातयन्ति<br>नद्यो हि कूलानि कुलानि नार्यः ।। | |
| 23 | उत्सृष्टिकांके मुख्यः रसः कः ? | |
| 24 | 'पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति' इति सूक्तिः कस्मिन् ग्रन्थे प्राप्यते ? | |
| 25 | विदूषकविहीनस्य प्रख्यातनाटकस्य नाम किम् ? | |

⌘